Rahu kavacha - Devanagari

|| श्री महागणपतये नमः ||
Indian Astrology Source
www.astrovidya.com

## अथ राहु कवचं

ओं अस्य श्री राहु कवच महामंत्रस्य चंद्र ऋषिः। अनुष्टुप्छंदः। राहुर्देवता। नीं बीजं। ह्रीं शक्तिः। कां कीलकं। मम राहुग्रह प्रसाद सिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) रां अंगुष्ठाभ्यां नमः। रीं तर्जनीभ्यां नमः। रूं मध्यमाभ्यां नमः। रैं अनामिकाभ्यां नमः। रौं कनिष्ठिकाभ्यां नमः। रः करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) रां हृदयाय नमः। रीं शिरसे स्वाहा। रूं शिखायै वषट्। रैं कवचाय हुं। रौं नेत्रत्रयाय वौषट्। रः अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) प्रणमामि सदा राहुं सर्पाकारं किरीटिनं। सैंहिकेयं कराळास्यं भक्तानामभयप्रदं। राहुं चतुर्भजः चर्मशूल खड्गवरान्वितं। कृष्णांबरधरंमाल्यं कृष्णगंधानुलेपनं। गोमेधिक विभूषंच विचित्र मकुटोज्वलं। कृष्णसिंहरथारूढं मेरुंचैव प्रदक्षिणं॥ नीलांबर शिरः पातु ललाटं लोकवंदितः। चक्षुषी पातु मे राहुः श्रोत्रे मेर्धशरीरवान्। नासिकां मे कराळास्य शूलपाणिर्मुखं मम। जिह्वां मे सिंहिका सूनुः कंठं मे कष्टनाशनः। भुजंगेशो भुजौ पातु नीलमाल्य करौ मम\ पातु वक्षस्तममो मूर्तिः पातु नाभिं विधुंतुदः। कटिं मे विकटः पातु ऊरु मे सुरपूजितः। स्वर्भानुर्जानुनी पातु जंघे मे पातु चाप्यगुः। गुल्पौ ग्रहाधिपः पातु नीलचंदन भूषितः। पादौ नीलांबरः पातु सर्वांग सिंहिकासुतः। राहुरिदं कवचमीप्सितवस्तुवं यो भक्त्यापठत्यनुदिनं नियतश्शुचिस्सन्। प्राप्नोति कीर्तिमतुलं च श्रेयस्संमृद्धिं आरोग्यं आयुर्विजयं प्रसादात्। इति पद्म पुराणे राहु कवचं॥

**Please consider the environment - do not print unless essential**

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com